मिहाई ऐमिनेस्कु

दिव्यग्रह :

mihai eminescu's luceafarul

sanskrit version

by

urmila rani trikha

international academy eminescu
delhi - 1983

Illustrations : Rodica Anca

—मिहाई ऐमिनेस्कु

1. रूपवती राजकण्वा
श्रेष्ठराजकुलोत्पन्ना ।
तरुणी एकदा आसीत्
कथ्यते इति कथासु ।।

5. पितरोः अपत्या एका
सर्वकलानिपुणा सा ।
विभ्रति नक्षत्रमध्ये
चन्द्रकान्ति कन्यकाया ।।

9. छायायाः तोरणस्य या
निष्क्रान्ती, प्रयाति, पश्य ।
उपानावृत्तगवाक्षं
प्रतीक्षते शुक्रग्रहः

13. पश्यति क्षितिजं यत्र
कृष्णतरंगोपरि सा ।
नौरिव निशासमुद्रे
तरन्ति ग्रहकिरणाः ।।

17. तमीक्षते प्रतिरात्रिं
उर्ध्वम् आकाशास्थितं सा
निरूपयति तां बालां
विध्दः कमशरेण सः ।।

21 हस्ताभ्याम् मुखं आवृत्य
सा अक्षोमुखी तिष्ठति ।
कामशराः प्रविशन्ति
मनसि आत्मनि तस्याः ।

25. शोभते अधिकतरं
सौन्दर्यम् पश्यन् तस्याः ।
आप्तं कृष्णदुर्गछायात्
तिष्ठति अनिर्श यदा ।।

29. अनुगच्छति तां क्रमा –
नुक्रमं गृहम् वयति ।
शीतश्वेताविद्युत्लता –
याः तन्तुभिः बहिर्नेबस्त्रं ।।

33. शेते शययायां प्रक्षिप्य
स्वशरीर वाला यदा ।
प्रसरति तस्यहस्तं
उरोजनयनं त्वदा ।।

37. दर्पणात् ज्योतिकिरणः
विकरति संतपति ।
भ्रूपक्ष्मावृत्तविशाल -
नयने परावर्तते ।।

41. दर्पणे तमामिमुखीं
स्मयते कंपति तस्याः ।
स्वप्ने मज्जति सः यत् तौ
भवेसाम् निद्रैकात्मनौ ।।

45. निद्रायाम् आचक्षते सा
अस्पुटाक्षरैः निश्वस्य ।
एहि, निशापते न त्वं
किमर्थम् अधुनायासि ।।

49. अवतर शुक्रग्रह
ज्योतिकिरणात् प्रसर ।
एहि पे गृहं, जीवनं
ह्रदयं प्रकाशय च ।।

53. शृणोति भयमोहाक्रा –
न्तः तस्याम्बद्धभावः सः
मज्जति विधुत्वेगेन
समुद्रोग्रतरंगेषु ।।

57. अप्सु समाधिस्थः सन्
अतिसुन्दरयुवैकः ।
प्रत्यक्षीभवति गह –
नायतकृष्णावृत्तेभ्यः ।।

61. गवाक्षबहिर्द्वारोत्क्रम्य –
गृहं प्रविशति च ।
वक्रराजदण्डहस्तः
बिद्रुभकिरीटधारी ।।

65. कोमलस्वर्णकेशीयु –
वा यक्षकुमार इव ।
अनावृत्तांसोपरिग्र –
न्थिवद्ध नीलाम्बरः ।।

69. गौरसुन्दरतरूण –
क्षामवदनः ईक्षते ।
इहलोकं भासिते
नयने निर्जीवशरीरः ।।

73. यदा त्वया आहूयते
दुष्कर अत्रागमनं ।
खलु यतस्ति द्यौस्पिता
माता च समुद्रिका मे ।।

77. पुनर्भवाय तरंगान्
विद्युतिव अहम् प्राप्तः ।
यत् तव गृहम् प्रविश्य
देहधारी सन् तिष्ठानि ।।

81. एहि, मे निधे प्रिये त्वं
परित्यज तवलोकं ।
शुक्रग्रहः अस्मि अहं मां
निकषा वरेण्या भव ।।

85. युगशासितुं विद्रुभ -
प्रसादं आदेशयामि ।
सपुद्रतल प्राणिनः
तवादेशं पालयन्तु ।।

89. असि दर्शनीयः स्वप्ने
देवदर्शितरिव त्वं ।
त्वयाहृतलोकरीतिः
कदापि ममार्थम् नास्ति ।।

93. कस्त्वमसि कदर्थम् च
अपार्थिवः निवसति ।
सजीवाहं निर्जीव त्वं
ते नेत्रशीतमनः मे ।।

97. गतानि त्रीणि अहानि
आगत्य रात्रौ तनोति ।
शुक्रग्रहः उप्युपरि
तां शीतशान्तद्युति च ।।

101. सा तप्तमनहृदया
स्मरति अनुरक्ता तं ।
मनसिजेन प्रहृता
सतृष्णासमुद्रसम्राट ।।

105. अवतर शुक्रग्रहः
ज्योतिकिरणात् प्रसर ।
एहि, मे गृहं, जीवनं
हृदयं प्रकाशय च ।।

109. शृणोति कामपीड़ितः
दीपशिखाद्युतिहीनः ।
यत्र तिरोहितवान् सः
चक्रवत्प्रवर्तते द्यौ ।।

113. वायुमार्गे ज्वलन्वाह्निः
सर्वसंसार गृह्णाति ।
असतात् अजायत्
सुन्दरदृप्त पुरुषः ।।

117. कुण्डलित कृष्णाकेशैः
आवृत्ताग्नेय किरीटी ।
मन्ये, अवतरति सः
पृथिवीम् सूर्यमार्गेण ।।

121. कृष्णाम्बरसंदर्शितः
गौरसशक्तभुजः सः ।
आयाति अग्रतः पीतः
क्षामाचेन्तितवदनः ।।

125. विशालभव्यनेत्राभ्याम्
सः दहति दिव्यज्योति ।
अदभ्येच्छायाः रागस्य
ज्वालिते अंगारे इव

129. अहम् आयामि स्वस्थानात्
त्वया कृतावाह्नं श्रुत्वा
से माता निशासकाशात्
पितास्ति में सूर्यं तस्मात्

133. एहि, मे निधे प्रिये त्वं
परित्यज तवलोकं ।
शुक्रग्रहः अस्मि अहं, मां
निकषा वरेण्या भव ।।

137. एहि स्वर्णकेशपाशं
परितः ताराकिरीटंः ।
स्थापयिष्यामि सर्वेषां
भव स्वर्गे पूजास्थानं ।।

141. असि दर्शनीयः, स्वप्ने
दानवर्दिशतरिव ।
त्वयाहृतलोकरीतिः
कदापि ममार्थम् नास्ति ।।

145. मम हृदयं कामपीडित
निर्दयकामभावेन ।
उत्कण्ठिते तव नेत्रे
मम दहयते ताभ्यां च ।।

149. अवतरानि पृथिवीं
विसृज्य स्वर्गम् इति ते ।
अस्ति अभिलाषा, स्मर
अहं अमरः मृत्यः त्वं ।।

153. न अन्विष्ये विशेषाणि
पदानि विवादार्थप् च ।
यत्किंचित् भणितं त्वया
श्रुतुवान् न जाने अर्थम् ।।

157. यदि त्वं भवसे प्रिय
मम सत्यमेव एहि ।
शुक्रग्रह मास् निकषा
मृत्यरूपधारयित्वा ।।

161. प्रियायाः अधरदानं
प्राप्तु इच्छामि त्यजामि ।
अमरत्वं जानासि त्वं
त्वयि अधिकं स्निह्यामि ।।

165. अमरत्वहेतुपाप –
हातुं उपायं अन्विष्ये ।
चिन्तयामि नवमार्गम्
प्राप्तुं स्वाधीनता चलु ।।

169. मृत्यकन्यानुरक्तः सः
तिरोहितवान् अचिनोत् ।
आकाशात् अज्ञातमार्गम्
अग्रसरः बभूव च ।।

173. प्रतिवसति कटलीन.
प्रासादे अंगरक्षक. ।
दृष्ट. उत्सवे सदैव
मधुरहासयुक्तः सः

177. पात्राणि आपूर्यते सः
रक्तवर्णमदिराभिः ।
उच्चकुलनागतोऽपि
महिष्या सह गच्छति

181. न अस्त्रीकृतः साहसी
मन्दस्मितः राजकन्यां ।
रूपवती दुष्टवान् च
उवाच मदीया मदीया ।।

185. तां दृष्टिगतं करोति
सुन्दरतरां भवति ।
प्रतिदिनं अकथयत्
कस्मिंचित् दिवसे च ।।

189. हैमवतीं राजकन्यां
मनोभावं निवेदयत् ।
प्रत्यावदत् कटलीनः
गच्छ किं त्वया ईप्सितं ।।

193. यावत् स्थिता हास्यं विना
न गमिष्यामि खल्वहं ।
किंचित् कालं विनोदय
माम् अधरदानेन त्वं

197. न जानासि किं वदसि
आकाशास्थितः अस्ति मे ।
प्रियः शुक्रग्रहः गच्छ
कटलीन अस्मात् स्थानात् ।।

201. न त्वया ज्ञायते केन
प्रकारेण स्फुरति च ।
हृदयं तिष्ठ निकषा
क्षणमेव दर्शयामि ।।

205. गायन्पक्षिणो व्याधेन
क्षिप्तक्षौमपाशमिव ।
गृहाण कटिप्रदेशं
मे गृह्णामि ते बाहुभ्याम् ।।

209. ते कृशकटिप्रदेशं
परितः बाहून् उत्क्षिप्य ।
उद्वहामि यत्नयने
प्रेरयेते त्वं माम् प्रति ।।

213. यदा नमामि तवाननं
त्वां उत्पश्य सस्मितेन ।
शीघ्र गम्यते समयं
कटाक्षविनिभयेन ।।

217. त्वं असंशया भवति
कामकेलिक्रीडन्ती च ।
कुरूथाः अधरपानं
यदा संप्राप्ता अधरान् ।।

221. श्रुत्वा उतप्ता भवति
चिन्तयति करवाणि ।
किं इच्छासि अथवा न
तत्परा पालयितुं सा ।।

225. सा उवाच कटलीन
अनेकयुगेषु ज्ञातः ।
ते हसितानि अश्रूणि
मे सहभुक्तानि मया ।।

229. अन्तकालहीनलोकात्
आयाति शुक्रग्रहः स ।
समर्थः अमरवसूनि
समुद्रान् दिशः कर्तुम् मे ।।

233. यदा नेत्रे उन्मिष्येते
पक्ष्मणो पार्श्वे संजातेः ।
सर्वभयक्षालितानि
समुद्रक्षाराश्रुपातेः ।।

237. अनन्तानुरागेण सः
दिव्यति छेत्तु मे व्यथा ।
यत्र हस्तो प्रसारयापि
तं प्रति वृथेव अहं ।।

241. शीतशुभ्ररश्मि मार्गेण
नक्षत्राणांआयाति सः ।
संसारे दूरतः एव
तस्मिन् स्निह्यामि सदैव ।।

245. अनन्तक्रमाणि इव
निरर्थकाः दिवसाः मे ।
प्रतीयन्ते नक्तांसि च
तिरोहितानि रम्याणि ।।

249. मे मनोज्ञकन्ये एहि
जीवनं यशसं आवाप्
लप्स्यावहे अवगच्छति
न स्मरिष्यति कः अपि ।।

253. प्रसन्नौ धीमन्तौ स्यावः ।
अतिस्नेहयुक्तौ पित्रोः ।
शुक्रग्रहविरहजां
शुचं न गणयिष्यासि ।।

257. शुक्रग्रहः उड्डयति
विशालपक्षाभ्यां स्वर्गम् ।
अनन्तवायुमार्गेण
गच्छन्वृहदाकार सन् ॥

261. व्योम आकाशनक्षत्राः त य
उपरि नक्षत्राः नीचैः ।
आकाशहीन ज्योतिः
तेषां मध्ये विचरपि ।

265. असतोपत्यकायां.
गच्छन् पश्यति परितः ।
युगप्रथमदिवसे
इव ज्योतिमुद्रिकां सः ॥

269. उदग्रम् स्थानात् जायते
प्रताड़ित प्रसरति ।
प्रलयतरंगमध्ये
कामभावेन प्रेरितः ।

273. सीमाविहीनप्रदेशः
नेत्राभ्याम् न दृश्यते ।
उद्भावितुं बिचेष्टते
यत्र काल असतात् च ॥

277. नास्ति किंचित् आक्रान्तः स ॥
शून्यहृदवः क्षीयते ।
तृष्णयापूर्णरूपेन
स्मृतिविभ्रमः जायते ॥

281. हे तात विमोचय मां
अमरत्वकृणाम्बरात् ।
एतदर्थंप् सदैव च
गृहाण मे स्तोत्राणि ॥

285. वद मूल्यं किं दास्यामि
विमुक्तये प्राचीनेभ्यः ।
निरर्थकेभ्यः मार्गेभ्यः
जीवनमृत्युसम्राट ॥

289. गृहाण अनन्तकालं
शामय दहन्वहनयः ।
भीषणाः मां निरन्तरं
स्निहयानि मानवे क्षणाम् ॥

293. असतात् आगतः पुनः
तत्रैव गमिष्यामि अहं ।
विश्रामस्थानात् जीवितः
तमेब लप्स्ये अधुना ॥

297. शुक्रग्रहः उतिष्ठसि
रसातलात् लोकनाथ ।
न पृच्छ मह्यम् चिन्हानि
आकारहीनाद्भुतानि ॥

301. कांक्षसि मानवरूपं
मानवं इव रूपं वा ।
यदा प्राणिनः म्रियन्ते
जयन्ते पुनः मानवाः :

305. वायुसमक्षनिर्मित –
मिथ्यादर्शदुर्गः नरैः ।
यदा समाधिः क्षालितः
तरंगैः अनुगम्यते ॥

309 भाग्योदयनक्षत्रानि
जायन्ते नरैः वसन्ति ।
तानि काले न आकाशे
मृत्युमपि न जानन्ति ॥

313. जायन्ते अव्ययभूतात्
नश्वराणि आश्रिताः ।
आकाशं नष्टाः आदित्याः
यत् पुनः उद्भवन्तुते ॥

317. सर्वभूतानि मर्त्यानि
मानवाः कालसंप्राप्ते ।
जायन्ते मरणाय च
म्रियन्ते पुनर्भवाय ॥

321. शुक्रग्रहः भ्रमरः त्वं
अस्सि तिरोहिते सति ।
शून्यं प्राप्स्यसे पृच्छ मां
ज्ञानं त्वां अध्यापयामि ।।

325. कांक्षसि मधुरवाणीं
किं यत् ते गीतरायेण ।
आकृष्यन्ते सर्वाः एव
सनुद्रवनपर्वताः ।।

329. कांक्षसि किं दर्शयितुं
आचरितेभ्यः सामार्थ्यप् ।
तव न्यायप्रियता च
चक्रवर्तिसाम्राज्यं वा ।।

333. दास्ये ते बहवः नावः
महतीं चमूं यत् तीर्त्वा ।
नीलसमुद्रैः उपैषि
सर्वसंसारं न सृत्युं ।।

337. कस्मै मरणं कांक्षति
परावर्तस्व स्वस्थानं ।
ईक्षस्व पुनः च ज्ञातुं
किं प्रतीक्षते तत्र त्वां ।।

341. आकाश परावर्तते
शुक्रग्रहः स्वराज्यं
सर्वसंसारं उपरि
तनोति ज्योतिरश्मयः ।।

345. सन्ध्यावसाने संसारे
चरन्ति निशायाः छायाः ।
उदेति तरगेभ्यः च
वेपन्ती चन्द्रिका तदा ।

349. दीपयन्ती वनराजिं वनानि
सूचयन्ती पन्थानः च ।
उपरि विटपपंक्ति
तिष्ठतः अध्यधि प्रियौ ।।

353. हृदयसपन्दनं ते
प्रिये धन्यः भवे श्रुत्वा ।
अवर्णनीय मधुर
तेजयुक्ते नेत्रे दृष्ट्वा ।।

357. तमसावृत्तपन्थानः
मे वृद्धैः दीपयति च ।
कामभावं शीतलतां
शान्तिं अधिगमयति ।।

361. उपरि अधितिष्ठन्ति
नियन्तुं विहन्तुं आधि ।
मे प्रथमप्रियतम
त्वम् आसि अन्ततः स्वपनः ।।

365. शुक्रग्रहः पश्यति तौ
प्रेममन्त्रवद्धौ अधः ।
ग्रीवां हस्ते प्रसरंति
बाहुभ्याम् गृह्यते तया ।।

369. सुगन्धं ददति रात्रौ
वायुं रजतपुष्पाणि ।
दिव्यन्ति च वर्षाम् इव
उपरि स्वर्णं केशिनौ ।।

373. काममोहिता पश्यति
उर्ध्वम् कृत्वा दृष्टिपातं ।
शुक्रग्रहं अभिव्यक्तुं
अभिलाषानि कांक्षति ।।

377. अवतर शुक्रग्रह
ज्योतिकिरणात् प्रसर ।
एहि उपरि माम् वर्न
मे भाग्यानि प्रकाशय ।।

381. प्रेषत् अद्रिवनोपरि
कम्पन्तीं विद्युल्लतां सः ।
छेत्तुं एकान्ततां खलु
प्रसरतां तरंगाणाम् ।।

385. समुद्रतले अधुना
न निमज्जति वदति ।
मृत्पिण्डै अपेक्षसे किं
अहं वा अन्यो इत्येव ।।

389. वसथ संकीर्णलोके
भाग्यक्रीडका त्वमसि ।
अहं तु अस्मि अमरः
अस्पृश्ये अमर लोके ।।

Mihai Eminescu's *Luceafarul* (Hyperion), appeared a hundred years ago, in 1883, in Vienna. Out of a genuine smrti we print now in Delhi the Urmila Rani Trikha's Sanskrit version, *Divyagrahah*. This translation from Romanian has been already appreciated by well-known Sanskrit scholars like Satyavrat Shastri, Kapila Vatsyayan, Sergiu Al-George; enjoyed by literary audiences and students. Thus, we may be attending a moment in Indo-eminescology. Amita Bhose has concluded, in Romania, a book by stating that Eminescu is the only European poet who made India immortal in his country but here, in India, Urmila Trikha has transposed *Luceafarul* in slokas within a symbolical gathering of immortal Sanskrit sounds and feelings known by any sahrdaya as any Romanian recites stanzas from Eminescu.

There are many Romanian studies on Eminescu and Rigveda/Kathaupanishad/the Buddha/Kalidasa/Tagore, and India as such, which like Max Muller he hadn't seen physically. *Luceafarul* is the *Gitagovinda* of Romanians. The anustubh in the present version, like in Veda and Avesta, recalls also Eminescu's original metre on a 'story' like Jayadeva's. At the same time, the metres of Gitagovinda are to be reimagined through all Eminescu's poetry. The Sanskrit and the Romanian aren't perhaps the two closest languages in the world but one can thing so on this ground. And if Urmila Rani Trikha did know a better Romanian after accomplishing her Sanskrit Hyperion, one can get closer to Eminescu by translating Jayadeva into Romanian. The illustrations to the both first editions of Eminescu's *Luceafarul* in Sanskrit and, respectively, Jayadeva's *Gitagovinda* in Romanian are intended accordingly.

George Anca

Printed at: Amrit Printing Works, 126 Mall Road, Delhi-9.
Rs. 75